# Vishalakshi Stotram Vyasakritam

# વિશાલાક્ષીસ્તોત્રમ્ વ્યાસકૃતમ્

## Document Information

Text title : Vishalakshi Stotram Vyasakritam

File name : vishAlAkShIstotramvyAsakRRitaM.itx

Category : devii, devI, stotra

Location : doc_devii

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Description/comments : From Saurapurana

Latest update : December 11, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# વિશાલાક્ષીસ્તોત્રમ્ વ્યાસકૃતમ્

(સૌરપુરાણે અષ્ટમાધ્યાયાન્તર્ગતમ્)

વ્યાસ ઉવાચ-
વિશાલાક્ષિ નમસ્તુભ્યં પરબ્રહ્માત્મિકે શિવે ।
ત્વમેવ માતા સર્વેષાં બ્રહ્માદીનાં દિવૌકસામ્ ॥ ૧૫॥

ઇચ્છાશક્તિઃ ક્રિયાશક્તિર્જ્ઞાનશક્તિસ્ત્વમેવ હિ ।
ઋજ્વી કુણ્ડલિની સુક્ષ્મા યોગસિદ્ધિપ્રદાયિની ॥ ૧૬॥

સ્વાહા સ્વધા મહાવિદ્યા મેધા લક્ષ્મીઃ સરસ્વતી ।
સતી દાક્ષાયણી વિદ્યા સર્વશક્તિમયી શિવા ॥ ૧૭॥

અપર્ણા ચૈકપર્ણા ચ તથા ચૈકૈકપાટલા ।
ઉમા હૈમવતી ચાપિ કલ્યાણી ચૈવ માતૃકા ॥ ૧૮॥

ખ્યાતિઃ પ્રજ્ઞા મહાભાગા લોકે ગૌરીતિ વિશ્રુતા ।
ગણામ્બિકો મહાદેવી નન્દિની જાતવેદસી ॥ ૧૯॥

સાવિત્રી વરદા પુણ્યા પાવની લોકવિશ્રુતા ।
આયતી નિયતી રૌદ્રી દુર્ગા ભદ્રા પ્રમાથિની ॥ ૨૦॥

કાલરાત્રી મહામાયા રેવતી ભૂતનાયિકા ।
ગૌતમી કૌશિકી ચાઽઽર્યા ચણ્ડી કાત્યાયની સતી ॥ ૨૧॥

વૃષધ્વજા શૂલધરા પરમા બ્રહ્મચારિણી ।
મહેન્દ્રોપેન્દ્રમાતા ચ પાર્વતી સિંહવાહના ॥ ૨૨॥

એવં સ્તુત્વા વિશાલાક્ષી દિવ્યૈરેતૈઃ સુનામભિઃ ।
કૃતકૃત્યોઽભવદ્વ્યાસો વારાણસ્યાં દ્વિજોત્તમાઃ ॥ ૨૩॥

વારાણસ્યાં વિશાલાક્ષી ગઙ્ગા વિશ્વેશ્વરઃ શિવઃ ।
ભક્તિઃ પશુપતૌ તત્ર દુર્લભં હિ ચતુષ્ટયમ્ ॥ ૨૪॥

યઃ પશ્યતિ વિશાલાક્ષીં સ્નાત્વા ગઙ્ગામ્ભસિ દ્વિજાઃ ।
અશ્વમેધસહસ્રસ્ય ફલમાપ્નોત્યનુત્તમમ્ ॥ ૨૫॥

વારાણસ્યારતુ માહાત્મ્યમિતિ કિઞ્ચિન્મયોદિતમ્ ।
યઃ પઠેચ્છૃણુયાદ્વાઽપિ યાતિ માહેશ્વરં પદમ્ ॥ ૨૬॥

ઇતિ સૌરપુરાણે અષ્ટમાધ્યાયાન્તર્ગતં વ્યાસકૃતં
વિશાલાક્ષીસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by PSA Easwaran

*Vishalakshi Stotram Vyasakritam*
pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*